श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ चतुःषष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुःषष्टितमः सर्गः ॥

## श्रीरामलक्ष्मणाभ्यां भूयः सीताया अन्वेषणं श्रीरामस्य शोकोद्गारो मृगेभ्यः सङ्केतं प्राप्य द्वयोर्भ्रात्रोर्दक्षिणदिशां प्रति गमनम्, पर्वताय क्रोधः, सीताया विकीर्णानि पुष्पाणि भूषणानां कणान् युद्धस्य चिह्नानि चावलोक्य श्रीरामेण देवादिसहितां त्रिलोकीं प्रति स्वस्य रोषस्य प्रकटनम्

स दीनो दीनया वाचा लक्ष्मणं वाक्यमब्रवीत्।
शीघ्रं लक्ष्मण जानीहि गत्वा गोदावरीं नदीम्॥ **3.64.1** ॥

अपि गोदावरीं सीता पद्मान्यानयितुं गता।
एवमुक्तस्तु रामेण लक्ष्मणः पुनरेव हि॥ **3.64.2** ॥

नदीं गोदावरीं रम्यां जगाम लघुविक्रमः।
तां लक्ष्मणस्तीर्थवतीं विचित्वा राममब्रवीत्॥ **3.64.3** ॥

नैनां पश्यामि तीर्थेषु क्रोशतो न शृणोति मे।
कं नु सा देशमापन्ना वैदेही क्लेशनाशिनी॥ **3.64.4** ॥

नहि तं वेद्मि वै राम यत्र सा तनुमध्यमा।
लक्ष्मणस्य वचः श्रुत्वा दीनः सन्तापमोहितः॥ **3.64.5** ॥

रामः समभिचक्राम स्वयं गोदावरीं नदीम्।
स तामुपस्थितो रामः क्व सीतेत्येवमब्रवीत्॥ **3.64.6** ॥

भूतानि राक्षसेन्द्रेण वधार्हेण हृतामपि।
न तां शशंसू रामाय तथा गोदावरी नदी ॥ **3.64.7** ॥

ततः प्रचोदिता भूतैः शंस चास्मै प्रियामिति।
न च सा ह्यवदत् सीतां पृष्टा रामेण शोचता ॥ **3.64.8** ॥

रावणस्य च तद्रूपं कर्मापि च दुरात्मनः।
ध्यात्वा भयात् तु वैदेहीं सा नदी न शशंस ह ॥ **3.64.9** ॥

निराशस्तु तया नद्या सीताया दर्शने कृतः।
उवाच रामः सौमित्रिं सीतादर्शनकर्शितः ॥ **3.64.10** ॥

एषा गोदावरी सौम्य किञ्चिन्न प्रतिभाषते।
किं नु लक्ष्मण वक्ष्यामि समेत्य जनकं वचः ॥ **3.64.11** ॥

मातरं चैव वैदेह्या विना तामहमप्रियम्।
या मे राज्यविहीनस्य वने वन्येन जीवतः ॥ **3.64.12** ॥

सर्वं व्यपानयच्छोकं वैदेही क्व नु सा गता।
ज्ञातिवर्गविहीनस्य वैदेहीमप्यपश्यतः ॥ **3.64.13** ॥

मन्ये दीर्घा भविष्यन्ति रात्रयो मम जाग्रतः।
मन्दाकिनीं जनस्थानमिमं प्रस्रवणं गिरिम् ॥ **3.64.14** ॥

सर्वाण्यनुचरिष्यामि यदि सीता हि लभ्यते।
एते महामृगा वीर मामीक्षन्ते पुनः पुनः ॥ **3.64.15** ॥

वक्तुकामा इह हि मे इङ्गितान्युपलक्षये।
तांस्तु दृष्ट्वा नरव्याघ्रो राघवः प्रत्युवाच ह ॥ **3.64.16** ॥

क्व सीतेति निरीक्षन् वै बाष्पसंरुद्धया गिरा।
एवमुक्ता नरेन्द्रेण ते मृगाः सहसोत्थिताः ॥ **3.64.17** ॥

दक्षिणाभिमुखाः सर्वे दर्शयन्तो नभःस्थलम्।
मैथिली ह्रियमाणा सा दिशं यामभ्यपद्यत ॥ **3.64.18** ॥

तेन मार्गेण गच्छन्तो निरीक्षन्ते नराधिपम्।
येन मार्गं च भूमिं च निरीक्षन्ते स्म ते मृगाः ॥ **3.64.19** ॥

पुनर्नदन्तो गच्छन्ति लक्ष्मणेनोपलक्षिताः।
तेषां वचनसर्वस्वं लक्षयामास चेङ्गितम् ॥ **3.64.20** ॥

उवाच लक्ष्मणो धीमाञ्ज्येष्ठं भ्रातरमार्तवत्।
क्व सीतेति त्वया पृष्टा यथेमे सह सोत्थिताः ॥ **3.64.21** ॥

दर्शयन्ति क्षितिं चैव दक्षिणां च दिशं मृगाः।
साधु गच्छावहे देव दिशमेतां च नैर्ऋतीम् ॥ **3.64.22** ॥

यदि तस्यागमः कश्चिदार्या वा साथ लक्ष्यते।
बाढमित्येव काकुत्स्थः प्रस्थितो दक्षिणां दिशम् ॥ **3.64.23** ॥

लक्ष्मणानुगतः श्रीमान् वीक्षमाणो वसुन्धराम्।
एवं सम्भाषमाणौ तावन्योन्यं भ्रातरावुभौ ॥ **3.64.24** ॥

वसुन्धरायां पतितपुष्पमार्गमपश्यताम्।
पुष्पवृष्टिं निपतितां दृष्ट्वा रामो महीतले ॥ **3.64.25** ॥

उवाच लक्ष्मणं वीरो दुःखितो दुःखितं वचः।
अभिजानामि पुष्पाणि तानीमानीह लक्ष्मण ॥ **3.64.26** ॥

अपिनद्धानि वैदेह्या मया दत्तानि कानने।
मन्ये सूर्यश्च वायुश्च मेदिनी च यशस्विनी ॥ **3.64.27** ॥

अभिरक्षन्ति पुष्पाणि प्रकुर्वन्तो मम प्रियम्।
एवमुक्त्वा महाबाहुर्लक्ष्मणं पुरुषर्षभम् ॥ **3.64.28** ॥

उवाच रामो धर्मात्मा गिरिं प्रस्रवणाकुलम्।
कच्चित् क्षितिभृतां नाथ दृष्टा सर्वाङ्गसुन्दरी॥ **3.64.29** ॥

रामा रम्ये वनोद्देशे मया विरहिता त्वया।
क्रुद्धोऽब्रवीद् गिरिं तत्र सिंहः क्षुद्रमृगं यथा॥ **3.64.30** ॥

तां हेमवर्णां हेमाङ्गीं सीतां दर्शय पर्वत।
यावत् सानूनि सर्वाणि न ते विध्वंसयाम्यहम्॥ **3.64.31** ॥

एवमुक्तस्तु रामेण पर्वतो मैथिलीं प्रति।
दर्शयन्निव तां सीतां नादर्शयत राघवे॥ **3.64.32** ॥

ततो दाशरथी राम उवाच च शिलोच्चयम्।
मम बाणाग्निनिर्दग्धो भस्मीभूतो भविष्यसि॥ **3.64.33** ॥

असेव्यः सर्वतश्चैव निस्तृणद्रुमपल्लवः।
इमां वा सरितं चाद्य शोषयिष्यामि लक्ष्मण॥ **3.64.34** ॥

यदि नाख्याति मे सीतामद्य चन्द्रनिभाननाम्।
एवं प्ररुषितो रामो दिधक्षन्निव चक्षुषा॥ **3.64.35** ॥

ददर्श भूमौ निष्क्रान्तं राक्षसस्य पदं महत्।
त्रस्ताया रामकाङ्क्षिण्याः प्रधावन्त्या इतस्ततः॥ **3.64.36** ॥

राक्षसेनानुसृप्ताया वैदेह्याश्च पदानि तु।
स समीक्ष्य परिक्रान्तं सीताया राक्षसस्य च॥ **3.64.37** ॥

भग्नं धनुश्च तूणी च विकीर्णं बहुधा रथम्।
सम्भ्रान्तहृदयो रामः शशंस भ्रातरं प्रियम्॥ **3.64.38** ॥

पश्य लक्ष्मण वैदेह्या कीर्णाः कनकबिन्दवः।
भूषणानां हि सौमित्रे माल्यानि विविधानि च॥ **3.64.39** ॥

तप्तबिन्दुनिकाशैश्च चित्रैः क्षतजबिन्दुभिः।
आवृतं पश्य सौमित्रे सर्वतो धरणीतलम्॥ **3.64.40** ॥

मन्ये लक्ष्मण वैदेही राक्षसैः कामरूपिभिः।
भित्त्वा भित्त्वा विभक्ता वा भक्षिता वा भविष्यति॥ **3.64.41** ॥

तस्या निमित्तं सीताया द्वयोर्विवदमानयोः।
बभूव युद्धं सौमित्रे घोरं राक्षसयोरिह॥ **3.64.42** ॥

मुक्तामणिचितं चेदं रमणीयं विभूषितम्।
धरण्यां पतितं सौम्य कस्य भग्नं महद् धनुः॥ **3.64.43** ॥

राक्षसानामिदं वत्स सुराणामथवापि वा।
तरुणादित्यसङ्काशं वैदूर्यगुलिकाचितम्॥ **3.64.44** ॥

विशीर्णं पतितं भूमौ कवचं कस्य काञ्चनम्।
छत्रं शतशलाकं च दिव्यमाल्योपशोभितम्॥ **3.64.45** ॥

भग्नदण्डमिदं सौम्य भूमौ कस्य निपातितम्।
काञ्चनोरश्छदाश्चेमे पिशाचवदनाः खराः॥ **3.64.46** ॥

भीमरूपा महाकायाः कस्य वा निहता रणे।
दीप्तपावकसङ्काशो द्युतिमान् समरध्वजः॥ **3.64.47** ॥

अपविद्धश्च भग्नश्च कस्य साङ्ग्रामिको रथः।
रथाक्षमात्रा विशिखास्तपनीयविभूषणाः॥ **3.64.48** ॥

कस्येमे निहता बाणाः प्रकीर्णा घोरदर्शनाः।
शरावरौ शरैः पूर्णौ विध्वस्तौ पश्य लक्ष्मण॥ **3.64.49** ॥

प्रतोदाभीषुहस्तोऽयं कस्य वा सारथिर्हतः।
पदवी पुरुषस्यैषा व्यक्तं कस्यापि रक्षसः॥ **3.64.50** ॥

वैरं शतगुणं पश्य मम तैर्जीवितान्तकम्।
सुघोरहृदयैः सौम्य राक्षसैः कामरूपिभिः ॥ **3.64.51** ॥

हृता मृता वा वैदेही भक्षिता वा तपस्विनी।
न धर्मस्त्रायते सीतां ह्रियमाणां महावने ॥ **3.64.52** ॥

भक्षितायां हि वैदेह्यां हृतायामपि लक्ष्मण।
के हि लोके प्रियं कर्तुं शक्ताः सौम्य ममेश्वराः ॥ **3.64.53** ॥

कर्तारमपि लोकानां शूरं करुणवेदिनम्।
अज्ञानादवमन्येरन् सर्वभूतानि लक्ष्मण ॥ **3.64.54** ॥

मृदुं लोकहिते युक्तं दान्तं करुणवेदिनम्।
निर्वीर्य इति मन्यन्ते नूनं मां त्रिदशेश्वराः ॥ **3.64.55** ॥

मां प्राप्य हि गुणो दोषः संवृत्तः पश्य लक्ष्मण।
अद्यैव सर्वभूतानां रक्षसामभवाय च ॥ **3.64.56** ॥

संहृत्यैव शशिज्योत्स्नां महान् सूर्य इवोदितः।
संहृत्यैव गुणान् सर्वान् मम तेजः प्रकाशते ॥ **3.64.57** ॥

नैव यक्षा न गन्धर्वा न पिशाचा न राक्षसाः।
किन्नरा वा मनुष्या वा सुखं प्राप्स्यन्ति लक्ष्मण ॥ **3.64.58** ॥

ममास्त्रबाणसम्पूर्णमाकाशं पश्य लक्ष्मण।
असम्पातं करिष्यामि ह्यद्य त्रैलोक्यचारिणाम् ॥ **3.64.59** ॥

सन्निरुद्धग्रहगणमावारितनिशाकरम्।
विप्रणष्टानलमरुद्भास्करद्युतिसंवृतम् ॥ **3.64.60** ॥

विनिर्मथितशैलाग्रं शुष्यमाणजलाशयम्।
ध्वस्तद्रुमलतागुल्मं विप्रणाशितसागरम् ॥ **3.64.61** ॥

त्रैलोक्यं तु करिष्यामि संयुक्तं कालकर्मणा।
न ते कुशलिनीं सीतां प्रदास्यन्ति ममेश्वराः ॥ **3.64.62** ॥

अस्मिन् मुहूर्ते सौमित्रे मम द्रक्ष्यन्ति विक्रमम्।
नाकाशमुत्पतिष्यन्ति सर्वभूतानि लक्ष्मण ॥ **3.64.63** ॥

मम चापगुणोन्मुक्तैर्बाणजालैर्निरन्तरम्।
मर्दितं मम नाराचैर्ध्वस्तभ्रान्तमृगद्विजम् ॥ **3.64.64** ॥

समाकुलममर्यादं जगत् पश्याद्य लक्ष्मण।
आकर्णपूर्णैरिषुभिर्जीवलोकदुरावरैः ॥ **3.64.65** ॥

करिष्ये मैथिलीहेतोरपिशाचमराक्षसम्।
मम रोषप्रयुक्तानां विशिखानां बलं सुराः ॥ **3.64.66** ॥

द्रक्ष्यन्त्यद्य विमुक्तानाममर्षाद् दूरगामिनाम्।
नैव देवा न दैतेया न पिशाचा न राक्षसाः ॥ **3.64.67** ॥

भविष्यन्ति मम क्रोधात् त्रैलोक्ये विप्रणाशिते।
देवदानवयक्षाणां लोका ये रक्षसामपि ॥ **3.64.68** ॥

बहुधा निपतिष्यन्ति बाणौघैः शकलीकृताः।
निर्मर्यादानिमान् लोकान् करिष्याम्यद्य सायकैः ॥ **3.64.69** ॥

हृतां मृतां वा सौमित्रे न दास्यन्ति ममेश्वराः।
तथारूपां हि वैदेहीं न दास्यन्ति यदि प्रियाम् ॥ **3.64.70** ॥

नाशयामि जगत् सर्वं त्रैलोक्यं सचराचरम्।
यावद् दर्शनमस्या वै तापयामि च सायकैः ॥ **3.64.71** ॥

इत्युक्त्वा क्रोधताम्राक्षः स्फुरमाणोष्ठसम्पुटः।
वल्कलाजिनमाबद्ध्य जटाभारमबन्धयत् ॥ **3.64.72** ॥

तस्य क्रुद्धस्य रामस्य तथाभूतस्य धीमतः।
त्रिपुरं जघ्नुषः पूर्वं रुद्रस्येव बभौ तनुः॥ **3.64.73** ॥

लक्ष्मणादथ चादाय रामो निष्पीड्य कार्मुकम्।
शरमादाय सन्दीप्तं घोरमाशीविषोपमम्॥ **3.64.74** ॥

सन्दधे धनुषि श्रीमान् रामः परपुरञ्जयः।
युगान्ताग्निरिव क्रुद्ध इदं वचनमब्रवीत्॥ **3.64.75** ॥

यथा जरा यथा मृत्युर्यथा कालो यथा विधिः।
नित्यं न प्रतिहन्यन्ते सर्वभूतेषु लक्ष्मण।
तथाहं क्रोधसंयुक्तो न निवार्योऽस्म्यसंशयम्॥ **3.64.76** ॥

पुरेव मे चारुदतीमनिन्दितां
    दिशन्ति सीतां यदि नाद्य मैथिलीम्।
सदेवगन्धर्वमनुष्यपन्नगं
    जगत् सशैलं परिवर्तयाम्यहम्॥ **3.64.77** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे चतुःषष्टितमः सर्गः॥